# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- दिसम्बर-२०१८

| | | |
|---|---|---|
| कक्षा – **शास्त्री-०१ सेमेस्टर-०१** | **प्रश्नपत्रम्- ०७** | गुणाः - ७० |
| विषयः– पौरोहित्यम् | कोड – CE 111 (NEW/OLD) | समयः –२:०० तः ०५:०० |
| दिनाङ्कः – २१/१२/२०१८ | ग्रन्थः – याज्ञवल्क्यस्मृतिः (आचाराध्यायः) | |

**प्रथमान्वितिः**

प्रश्नः १ निम्नाङ्कितेषु प्रश्नेषु द्वयोः व्याख्या कार्या । १०

(१) गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनयनम्।
राज्ञेमेकादशे सैके विशामेके यथाकुलम्॥

(२) सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः।
अनिन्द्येषु विवाहेषु पुत्राः संतानवर्धना॥

(३) इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम्।
अयं तु परमो धर्मो यत्योगानात्मदर्शनम्॥

प्रश्नः २ कस्यचिदेकस्य विषये यथाग्रन्थं विशदं वर्णयत। १०

(१) प्रशंसासहितं वेदग्रहणाध्यायन्फलम्।

(२) विवाहस्य अष्टभेदाः।

**द्वितीयान्वितिः**

प्रश्नः ३ एकस्य निबन्धात्मकम् उत्तरं लिखत। १०

(१) 'गोदनफलम्' इति विषये विवेचयत।

(२) द्रव्यशुद्धिस्सहिताध्ययनधर्मविषये यथाशास्त्रं लिखत।

प्रश्नः ४ अधोलिखितेषु द्वयोः व्याख्या विधेया। १०

(१) इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च
प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा॥

(२) ब्राह्मे मुहूर्ते चोत्थाय चिन्तयेदात्मनोहितम्।
धर्मार्थकामान् स्वेकाले यथाशक्ति न हापयेत्॥

(३) शरीरचिन्तां निर्वर्त्य कृतशौचविधिर्द्विजः।
प्रातःसन्ध्यामुपासीत दन्तधावनपूर्वकम्॥

**तृतीयान्वितिः**

प्रश्नः ५ एकस्य निबन्धात्मकमुत्तरं यच्छत। १०

(१) श्राद्धप्रकरणान्तर्गतब्राह्मणप्रार्थनाविषये यथांशास्त्रं वर्णयत।

(२) राजधर्मप्रकरणान्तर्गतपौरोहितलक्षणान् वर्णयत।

प्रश्नः ६ अधोलिखितेषु द्वयोः व्याख्या कार्या। १०

(१) श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत्।
वृष्ट्यायुः पुष्टिकामो वा तथैवाऽभिचरन्नपि ॥

(२) पुण्यात्षड्भागमादत्ते न्यायेन परिपालनम्।
सर्वदानाधिकं यस्मात्प्रजानां परिपालनम्॥

(३) सहस्राक्षं शतधारमृषिभिः पावनं कृतम्।
तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते।

प्रश्नः ७ केचन दशप्रश्नानाम् एकवाक्येनोत्तरं लिखत। १०

(१) उत्तमविवाहः कः ?
(२) कतिविधानि विद्यास्थानानि ?
(३) वेद एव द्विजातीनाम् ................?
(४) स्त्रीषु सोमदेवस्य कः अंशः?
(५) वर्णाः कतिविधाः ?
(६) संध्यानन्तरं किं कर्तव्यम् ?
(७) शूद्राणां कर्म किमस्ति?
(८) अयने-अयने को यागः कर्तव्यः ?
(९) समिधः कतिविधः ?
(१०) एकोद्दिष्टकर्म कदा कर्तव्यः ?
(११) श्राद्धदेवतानां नामानि लिखत।
(१२) आदित्यस्य सदापूजां...............स्वामिनस्तथा।
(१३) आचाराध्याये कति प्रकरणानि सन्ति ?
(१४) वर्णजातिविवेक-प्रकरणे कति श्लोकाः सन्ति ?
(१५) ग्रहाः कति सन्ति ?

***